ऽस्त्यन्तमात्मनः करणविरमणमस्ति "सधीः स्वप्नोभूत्वेमं लोकमतिक्रामतीति" तत्रापि धीसम्बन्धश्रवणात्। तथा च स्मरन्ति "इन्द्रियाणामुपरमे मनोऽनुपरतं यदि। सेवते विषयानेव तद्विद्यात् स्वप्नदर्शनमिति"। कामाद्यश्च मनसोवृत्तय इति श्रुतिः ताश्च स्वप्ने दृश्यन्ते तस्मात्-समना एव स्वप्ने विहरति। विहारोऽपि तत्रत्यो वासनामय एव न पारमार्थिकोऽस्ति। तथा च श्रुतिरिवकारानुबद्धमेव स्वप्नव्यापारं वर्णयति "उतेव स्त्रीभिः सह मोदमानो यच्छ्रुतेवापि भयानि पश्यन्निति"। लौकिका अपि तथैव स्वस्वप्नं कथयन्ति 'आरुक्षमिव गिरिशृङ्गमद्राक्षमिव वनराजिमिति'। तथोपादाने यद्यपि करणेषु कर्म्मकरणविभक्ति-निर्देशस्तथापि तत्संयुक्तस्यैवात्मनः कर्त्तृत्वं द्रष्टव्यं केवलेकर्त्तृत्वासम्भवस्य दर्शितत्वात्। भवति च लोकेऽनेकप्रकारा विवक्षा 'योधा युध्यन्ते' 'योधै राजा युध्यते' इति च। अपि चास्मिन्नुपादाने करणव्यापारोपरममात्रं विवक्ष्यते न स्वातन्त्र्यं कस्यचित्, अवुद्धिपूर्व्वकस्यापि स्वापे-करणव्यापारोपरमस्य दृष्टत्वात्। यस्त्वयं व्यपदेशो दर्शितः "विज्ञानं यज्ञं तनुते" इति स बुद्धेरेव कर्त्तृत्वं प्रापयति विज्ञानशब्दस्य तत्र प्रसिद्धत्वात् मनोऽनन्तर पाठाच्च "तस्य श्रद्धैव शिरः" इति विज्ञानमयस्यात्मनः श्रद्धाद्यवयवत्वसंकीर्त्तनात् श्रद्धादीनाञ्च वुद्धिधर्म्मत्वप्रसिद्धेः "विज्ञानं देवाः सर्व्वे ब्रह्मज्येष्ठमुपासते" इति च वाक्य-शेषात् ज्येष्ठत्वस्य बुद्धौ प्रसिद्धत्वात् "स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञ" इति च श्रुत्यन्तरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणात्। न च बुद्धेः शक्तिविपर्य्ययः करणानां कर्त्तृत्वाभ्युपगमे भवति सर्व्वकारकाणामेव स्वव्यापारेषु कर्त्तृत्वस्यावश्यंभावित्वात्। उपलब्ध्यपेक्षं त्वेषां करणत्वं सा चात्मनः। न च तस्यामप्यस्य कर्त्तृत्वमस्ति नित्योपलब्धिस्वरूपत्वात्। अहङ्कारपूर्व्वकमपि कर्त्तृत्वं नोपलब्धुर्भवितुमर्हति अहङ्कारस्याप्युपलभ्यत्वात्। न चैवं सति करणान्तरकल्पनाप्रसङ्गः बुद्धेः करणत्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः। यथाप्राप्तमेव कर्त्तृत्वमुपादाय समाधिविधानात्। तस्मात् कर्त्तृत्वमप्यात्मन उपाधिनिबन्धनमेवेस्थितम्" भा०। "अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इति गीतया कर्त्तृत्वस्याहङ्काराधीनतयौपाधिकत्वं सूचितमिति द्रष्टव्यम्"।

तथा चान्तःकरणोपहितचैतन्यमेव जीवः स एव वेदान्तिमते कर्त्तेति तत्त्वम्। तस्य च ईश्वराधीनयैव कर्त्तृत्वं तदपि "परात्तु तच्छ्रुतेः" इत्यादिशा० सूत्रभाष्ययोर्व्यवस्थापितं तच्च ईश्वरशब्दे दर्शितमिति। स्त्रियां ङीप् कर्त्त्री। "कर्त्तरि कृत्" "कर्त्तृकरणयोस्तृतीया" "अकर्त्तरि च कारके" "कर्त्तुरीप्सिततमं कर्म" "कर्त्तुः क्यङ् सलोपश्च" "कर्त्तुरुपमानादाचारे क्यङ्" "शेषात् कर्त्तरि परस्मैपदम्" पा० "कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्" हरिः २तत्प्रयोजके "तत्प्रयोजको हेतुश्च" पा० "अकर्त्तर्य्यृणे" पा०। कर्त्तुर्भावः त्व कर्त्तृत्व न० तल् कर्त्तृता स्त्री कृत्याश्रयत्वे क्रियाश्रयत्वे च। तत्र नैयायिकमते आख्यातस्य कृतौ शक्तिः वैयाकरणमते कर्त्तरि शक्तिः "कर्त्तरि कृत्" "लः कर्म्मणि भावे चाकर्मकेभ्यः" पा० सूत्राभ्यां तथैव प्रतिपादनात् "कर्त्तरि कृत्" इत्यतः कर्त्तृपदस्यैव परसूत्रेऽनुवृत्तेः लकारस्यापि तदर्थकतैवेत्याकरे स्थितम्। अधिकमाख्यातशब्दे उक्तम्। "न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः" गीता। ३परमेश्वरे पु० तस्य सर्वकर्त्तृत्वात्" "एतेषां पुरुषाणां स कर्त्ता यस्य वैतत् कर्म स वै वेदितव्यः" इति श्रुतेस्तस्य तथात्वम् यथा च तस्य सर्वकर्त्तृत्वं तथा ईश्वरशब्दे दर्शितम्। "करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः" विष्णुस०। कृत—तृच्। ४छेदके त्रि० स्त्रियां ङीप् "क्रोधहा क्रोधकृत्कर्त्ता" विष्णुस०। क्रोधकृतां दैत्यानां कर्त्ता भेदकः इत्येकं नामेति" भा० (कात) ५क्षुद्रखड्गे न०। तस्य कर्त्तनहेतुत्वात् तथात्वम् "चतुर्भुजां लम्बाङ्गीं तु दक्षेण कर्त्तृखर्परौ" ताराध्यानम्। ६शल्लिकायां स्त्री ङीप्। "कर्त्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्" ताराध्यानम्। उभयमपि उग्रताराशब्दे दर्शितम्। (कातारी) ७कर्त्तर्य्याम् शब्दरत्ना०। स्वल्पार्थे क। कर्त्तृकापि क्षुद्रखड्गे स्त्री "हास्ययुक्तां त्रिनेत्राञ्च कपालकर्त्तृकाकराम्" तन्त्रसा० श्यामाध्यानम्। किरति विक्षिपति कायम् कॄ—विक्षेपे तृच्। ज्वरादिहेतुके दद्राहादौ। ततोऽस्त्यर्थे मतुप् कर्त्तृमत् कर्त्तृयुक्ते त्रि० स्त्रियां ङीप्। "ह्रस्वनुड्भ्यां मतुप्" पा० अस्य उदात्तत्वम्। कर्त्तृशब्दे उपपदे दिवाविभेत्यादिना कृञः टः। कर्त्तृकर कर्त्तृकारके तत्प्रयोजके। स्त्रियां ङीप्। इष्टे ईयसि च तृणोलोपः करिष्ठः करीयान्। तृचस्तु न लुक्। डिद्वद्भावे कर्त्तिष्ठः कर्त्तीयानिति भेदः।

कर्त्त शैथिल्यकरणे अद० चुरा० उभय० सक० शैथिल्ये अक० सेट् कर्त्तयति ते कर्त्तापयतीत्येके अचकर्त्तत् त। कर्त्तयाम्-